

## अष्टमः पाठः

**पञ्चमी-षष्ठी-विभक्तिः**

# अस्माकं विद्यालयः

अस्माकं विद्यालयः ग्रामस्य समीपे अस्ति। प्रातः छात्राः मम ग्रामात् विद्यालयम् आगच्छन्ति। अन्येभ्यः ग्रामेभ्यः अपि छात्राः अत्र पठनाय समागच्छन्ति। विद्यालयस्य प्रार्थना-सभा अतीव मनोरमा अस्ति। प्रार्थनासभायाः अनन्तरं बालकाः बालिकाः च




स्व-स्व-कक्षां गच्छन्ति। ते शिक्षकेभ्यः विविधविषयान् पठन्ति। विद्यालयस्य पुस्तकालयात् छात्राः पुस्तकानि आनयन्ति। तत्र ते समाचारपत्राणि अपि पठन्ति। पुस्तकानाम् अध्ययनेन ज्ञानस्य विकासः भवति।

विद्यालयस्य पुरतः एकम् उद्यानम् अस्ति। उद्यानस्य शोभा अतीव रमणीया। अत्र पुष्पाणां बहवः प्रकाराः सन्ति। तेषाम् उपरि भ्रमराः गुञ्जन्ति। ते पुष्पाणां रसं पिबन्ति। तत्र खगानां कलकूजनम् अतिसुखदं भवति।



विद्यालयस्य क्रीडाक्षेत्रम् अतिविशालम् अस्ति। अत्र छात्राः न केवलं क्रीडाकालांशे अपि तु अवकाशात् परम् अपि क्रीडन्ति। क्रीडाशिक्षकात् ते क्रीडानिपुणताम् अधिगच्छन्ति। अस्माकं विद्यालये अध्ययनेन क्रीडनेन च छात्राणां शारीरिकः मानसिकः च विकासः भवति।

विद्यया विनयेन च सम्पन्नाः स्वस्थाः छात्राः एव समाजस्य देशस्य च सेवां कुर्वन्ति। उक्तञ्च–

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम्॥**

## शब्दार्थाः



| | | |
|---|---|---|
| **अन्येभ्यः ग्रामेभ्यः** | – | दूसरे गाँवों से |
| **समागच्छन्ति** | – | आते हैं/आती हैं |
| **अतीव** | – | अत्यन्त |
| **मनोरमा** (स्त्री.) | – | सुन्दर |
| **स्व-स्व-कक्षाम्** | – | अपनी अपनी कक्षाओं को (में) |

| | | |
|---|---|---|
| **विविधविषयान्** | – | तरह तरह के विषयों को |
| **आनयन्ति** | – | लाते हैं/लाती हैं |
| **पुरतः** (अव्यय) | – | सामने |
| **रमणीया** (स्त्री.) | – | सुन्दर |
| **उपरि** (अव्यय) | – | ऊपर |
| **भ्रमराः** | – | भौंरे |
| **गुञ्जन्ति** | – | गूँजते हैं/गूँजती हैं |
| **खगानाम्** | – | चिड़ियों/का/के/की |
| **कलकूजनम्** | – | चहचहाना/मधुरध्वनि |
| **सुखदम्** | – | सुख देने वाला |
| **अधिगच्छन्ति** | – | प्राप्त करते हैं/प्राप्त करती हैं |
| **सम्पन्नाः** | – | युक्त |
| **ददाति** | – | देता है/देती है |
| **पात्रत्वात्** | – | योग्यता से |
| **आप्नोति** | – | प्राप्त करता है/प्राप्त करती है |



## अभ्यासः

**1. उच्चारणं कुरुत–**

| | | |
|---|---|---|
| मोदकात् | मोदकाभ्याम् | मोदकेभ्यः |
| मालायाः | मालाभ्याम् | मालाभ्यः |
| चित्रात् | चित्राभ्याम् | चित्रेभ्यः |
| शुकस्य | शुकयोः | शुकानाम् |
| लतायाः | लतयोः | लतानाम् |
| चित्रस्य | चित्रयोः | चित्राणाम् |

## 2. रेखाङ्कितानि पदानि बहुवचने परिवर्तयत–

**यथा–** छात्राः ग्रामात् आगच्छन्ति।

छात्राः **ग्रामेभ्यः** आगच्छन्ति।

(क) जनाः आपणात् क्रीडनकानि क्रीणन्ति।

जनाः .......................... क्रीडनकानि क्रीणन्ति।

(ख) बालकाः पुस्तकालयात् पुस्तकानि आनयन्ति।

बालकाः .......................... पुस्तकानि आनयन्ति।

(ग) पत्रिकायाः चित्राणि पश्यत।

.......................... चित्राणि पश्यत।

(घ) शाखायाः पत्राणि आनय।

.......................... पत्राणि आनय।

(ङ) लतायाः पुष्पाणि चिनुत।

.......................... पुष्पाणि चिनुत।

(च) वृक्षात् पत्राणि पतन्ति।

.......................... पत्राणि पतन्ति।

**3. रेखाङ्कितानि पदानि एकवचने परिवर्तयत–**

**यथा–** वनानां दृश्यम्
**वनस्य** दृश्यम्

(क) उद्यानानां शोभा।
.............. शोभा।

(ख) चित्राणां वर्णः।
.............. वर्णः।

(ग) बालिकानाम् आभूषणम्।
.............. आभूषणम्।

(घ) कोकिलानां स्वरः।
.............. स्वरः।

(ङ) सिंहानां निद्रा।
.............. निद्रा।

(च) मेघानां गर्जनम्।
.............. गर्जनम्।

**4. अधोलिखितं चित्रं पश्यत। उदाहरणानुसारेण कोष्ठकगतैः शब्दैः वाक्यानि रचयत–**



**यथा-** (1) रामः (लव) **लवस्य** जनकः।

(2) रामः (दशरथ) ........................ पुत्रः।

(3) रामः ................................................

(4) ........................................................

(5) ........................................................

(6) ........................................................

(7) ........................................................

(8) ........................................................

## 5. चित्राणि दृष्ट्वा कोष्ठकगतशब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत-



मत्स्याः .................... बहिः आगच्छन्ति। (तडाग)



नृपः .................... पतति। (अश्व)



सर्पः .................... निर्गच्छति। (बिल)



.................... जलं पतति। (मेघ)



.................... पत्राणि पतन्ति। (वृक्ष)

### 6. उपयुक्तशब्दं चित्वा रिक्तस्थानानि पूरयत-

(क) बालकाः .................... गृहम् आगच्छन्ति। (विद्यालयात्/विद्यालयेन)

(ख) श्यामः .................... दुग्धम् आनयति। (गृहेण/गृहात्)।

(ग) नदी .................... प्रभवति। (पर्वतात्/पर्वतेन)।

(घ) माता .................... जलम् आनयति। (कूपेन/कूपात्)।

(ङ) नरेशः .................... वस्तूनि क्रीणाति (आपणेन/आपणात्)।

### 7. गोपालः किं किं वस्तु कुतः आनयति इति लिखत-

| | | | | |
|---|---|---|---|---|
| पुस्तकालयात् | ग्रामात् | मालाकारात् | कोषात् | आपणात् |

(क) .................... फलानि आनयति।

(ख) .................... पुस्तकानि आनयति।

(ग) .................... धनम् आनयति।

(घ) .................... दुग्धम् आनयति।

(ङ) .................... पुष्पाणि आनयति।